॥ वाल्मीकि रामायण॥

३ अरण्यकाण्ड

अध्याय ६

रामस्तु सहितो भ्रात्रा सीतया च परन्तपः ।
सुतीक्ष्णस्याश्रमपदं जगाम सह तैर्द्विजैः ॥ १॥

स गत्वा दूरमध्वानं नदीस्तीर्त्वा बहूदकाः ।
ददर्श विपुलं शैलं महामेघमिवोन्नतम् ॥ २॥

ततस्तदिक्ष्वाकुवरौ सततं विविधैर्द्रुमैः ।
काननं तौ विविशतुः सीतया सह राघवौ ॥ ३॥

प्रविष्टस्तु वनं घोरं बहुपुष्पफलद्रुमम् ।
ददर्शाश्रममेकान्ते चीरमालापरिष्कृतम् ॥ ४॥

तत्र तापसमासीनं मलपङ्कजटाधरम् ।
रामः सुतीक्ष्णं विधिवत्तपोवृद्धमभाषत ॥ ५॥

रामोऽहमस्मि भगवन्भवन्तं द्रष्टुमागतः ।
तन्माभिवद धर्मज्ञ महर्षे सत्यविक्रम ॥ ६॥

स निरीक्ष्य ततो वीरं रामं धर्मभृतां वरम् ।
समाश्लिष्य च बाहुभ्यामिदं वचनमब्रवीत् ॥ ७॥

स्वागतं खलु ते वीर राम धर्मभृतां वर ।
आश्रमोऽयं त्वयाक्रान्तः सनाथ इव साम्प्रतम् ॥ ८॥

प्रतीक्षमाणस्त्वामेव नारोहेऽहं महायशः ।
देवलोकमितो वीर देहं त्यक्त्वा महीतले ॥ ९॥

चित्रकूटमुपादाय राज्यभ्रष्टोऽसि मे श्रुतः ।
इहोपयातः काकुत्स्थो देवराजः शतक्रतुः ।
सर्वाँल्लोकाञ्जितानाह मम पुण्येन कर्मणा ॥ १०॥

तेषु देवर्षिजुष्टेषु जितेषु तपसा मया ।
मत्प्रसादात्सभार्यस्त्वं विहरस्व सलक्ष्मणः ॥ ११॥

तमुग्रतपसं दीप्तं महर्षिं सत्यवादिनम् ।
प्रत्युवाचात्मवान्रामो ब्रह्माणमिव वासवः ॥ १२॥

अहमेवाहरिष्यामि स्वयं लोकान्महामुने ।
आवासं त्वहमिच्छामि प्रदिष्टमिह कानने ॥ १३॥

भवान्सर्वत्र कुशलः सर्वभूतहिते रतः ।
आख्यातः शरभङ्गेन गौतमेन महात्मना ॥ १४॥

एवमुक्तस्तु रामेण महर्षिर्लोकविश्रुतः ।
अब्रवीन्मधुरं वाक्यं हर्षेण महताप्लुतः ॥ १५॥

अयमेवाश्रमो राम गुणवान्रम्यताम् इह ।
ऋषिसङ्घानुचरितः सदा मूलफलैर्युतः ॥ १६॥

इममाश्रममागम्य मृगसङ्घा महायशाः ।
अटित्वा प्रतिगच्छन्ति लोभयित्वाकुतोभयाः ॥ १७॥

तच्छ्रुत्वा वचनं तस्य महर्षेर्लक्ष्मणाग्रजः ।
उवाच वचनं धीरो विकृष्य सशरं धनुः ॥ १८॥

तानहं सुमहाभाग मृगसङ्घान्समागतान् ।
हन्यां निशितधारेण शरेणाशनिवर्चसा ॥ १९॥

भवांस्तत्राभिषज्येत किं स्यात्कृच्छ्रतरं ततः ।
एतस्मिन्नाश्रमे वासं चिरं तु न समर्थये ॥ २०॥

तमेवमुक्त्वा वरदं रामः सन्ध्यामुपागमत् ।
अन्वास्य पश्चिमां सन्ध्यां तत्र वासमकल्पयत् ॥ २१॥

ततः शुभं तापसभोज्यमन्नं
स्वयं सुतीक्ष्णः पुरुषर्षभाभ्याम् ।
ताभ्यां सुसत्कृत्य ददौ महात्मा
सन्ध्यानिवृत्तौ रजनीं समीक्ष्य ॥ २२॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for

his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com